# पाठनरूपरेखा

Teaching Module -Sanskrit

## एककम् ५ संस्कृतिः ।

UNIT - V

## पाठः ६- यागाश्वबन्धनम् (काव्यम्)

कालांशः १०

काव्यं द्विविधं दृश्यं श्रव्यं च। श्रव्यं श्रोतव्य मात्रं रामायणादयः। दृश्यं दर्शनयोग्यानि रूप काणि। नाटकम्, प्रकरणं, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनम् इति दशरूपकाणि। प्रायेण भारतीय रूपकाणि सुखान्तानि। भासनाटकचक्रेष्व न्यतमयूरु भङ्ग एक एव दुरन्तनाटकमिति विदुषां मतम्। अत्र भवभूति विरचितस्योत्तर रामचरितस्य चतुर्थोऽङ्कात् समाकलितः यागाश्वबन्धनमिति पाठ्यांशः। करुणरस प्रधानमपि सुखान्तनाटकं भवति उत्तरराम चरितम्।

# दशरूपकाणि।

# अष्टादश उपरूपकाणि च।

Module -1

**नाटकावतरणविषये चर्चा।**

नाटकस्वरूपं, कथापात्राणि, वेषभूषा इत्या दीनधिकृत्य कक्ष्यायां चर्चा करणीया।

चर्चाबिन्दवः:-

भरतमुनिः-नाट्यशास्त्रम्- नायकः - इतिवृत्तम्-भाषा।

[Group discussion]

उत्तररामचरितमाधारीकृत्य पाठ्यांशस्यापि चर्चा विधेया।

Module -1

**संश्लिष्टपदचयनम् नूतनपदचयनम् अर्थलेखनं च।** [Individual and group work]

| | |
|---|---|
| भगवत्यरुन्धति | संदीपनानि अक्षराणि |
| संदीपनान्यक्षराणि | भगवति अरुन्धति |
| ह्यायुधीयश्रेणयः | हि आयुधीयश्रेणयः |
| कोऽपि | कः अपि |
| प्रयोजनोऽयमश्वः | प्रयोजनः अयम् अश्वः |
| सोऽयमधुनाऽस्माभिः | सः अयम् अधुना अस्माभिः |
| सोऽप्यपूर्वारण्य | सः अपि अपूर्वारण्य |
| युष्माभिरपि | युष्माभिः अपि |
| लोष्ठैरभिघ्नन्त | लोष्ठैः अभिघ्नन्त |
| सस्पृहमात्मगतम् | सस्पृहम् आत्मगतम् |
| नूनमाश्वमेधिकोऽयमश्वः | नूनम् आश्वमेधिकः अयम् अश्वः |
| सगर्वमिव | सगर्वम् इव |
| किमुच्यते | किम् उच्यते |
| किमुक्तवानसि | किम् उक्तवान् असि, |
| किमुक्तैरेभिरधुना | किम् उक्तैः एभिःअधुना |
| महानुत्कर्षनिकषः | महान् उत्कर्षनिकषः |
| क्षत्रियाणामूर्जस्वलः | क्षत्रियाणाम् ऊर्जस्वलः |
| तत्किमक्षत्रिया | तत् किम् अक्षत्रिया |
| शकृत्पिण्डकानाम्रमात्रान् | शकृत् पिण्डकान् आम्रमात्रान् |
| पश्चात्पुच्छं | पश्चात् पुच्छं |
| तच्च | तत् च |
| चत्वार एव | चत्वारः एव |
| शष्पाण्यत्ति | शष्पाणि अत्ति |
| व्याख्यानैर्व्रजति, | व्याख्यानैः व्रजति, |

| | |
|---|---|
| पुनर्दूरम् | पुनः दूरम् |
| तस्मादितोऽन्यतो | तस्मात् इतः अन्यतः |
| तावत्पलायमानं | तावत् पलायमानं |
| दूरमतिक्रान्तः | दूरम् अतिक्रान्तः |
| वाल्मीकिराह | वाल्मीकिः आह |
| ज्ञातव्यमेतदवसरे | ज्ञातव्यम् एतद् अवसरे |
| किमपि | किम् अपि |
| दृष्टमवगतं | दृष्टम् अवगतं |
| स्वयमेव | स्वयम् एव |
| पठितमेव | पठितम् एव |
| तत्प्रायमेवान्यदपि | तत् प्रायम् एव अन्यद् अपि |
| गम्भीरमेतत् | गम्भीरम् एतत् |
| यदेवमुद्घोष्यते | यद् एवम् उद्घोष्यते |
| कुमारस्तावदाश्चर्यम् | कुमारः तावद् आश्चर्यम् |
| तत्काण्डम् | तत् काण्डम् |
| कवचिनो दण्डिनो | कवचिनः दण्डिनः |
| विप्रत्ययस्तत्पृच्छथ | विप्रत्ययः तत् पृच्छथ |
| धिग्जाल्मान् | धिक् जाल्मान् |
| नयतैनमश्वम् | नयत एनम् अश्वम् |
| धिक्चापलम् | धिक् चापलम् |
| राजपुत्रश्चन्द्रकेतुररिमर्दनः | राजपुत्रः चन्द्रकेतः अरिमर्दनः |
| यावदायाति | यावद् आयाति |
| तावत्त्वरितमनेन | तावत् त्वरितम् अनेन |
| रुगहनेनापसर्पत | तरुगहनेन अपसर्पत, |
| कृतमनेनाश्वेन | कृतम् अनेन अश्वेन, |
| कुमारमायुधीयश्रेणयः | कुमारम् आयुधीयश्रेणयः, |
| इतस्तदेहि | इतः तद् एहि |

| | |
|---|---|
| Module -1<br>**नूतनपदचयनम् अर्थलेखनं च।**<br>पूर्वाभ्यस्तानां पाठानां शब्दकोशस्य साहाय्येन पाठेऽस्मिन् इतः पूर्वमनागताः शब्दाः सन्ति चेत्तान् समुद्धृत्य तेषामप्यक्षरमालाक्रमेण शब्दकोशः निर्मापणीयः। | [Individual and Group work] |
| Module -1<br>**आशयावगमनम्**<br>गद्यांशस्य वा श्लोकांशस्य वा आशयव गमनाय प्रथमं पदच्छेदः (आवश्यकं चेत्) करणीयः। ततः विभक्तिः क इति चिन्तनीयः ततः तस्य विभक्तेरर्थः क इति ततः पदानां कर्तृ कर्म क्रियाबन्धत्वेन योजना कार्या। | [Individual and Group work]<br>TB , pp 65-68 |
| Module -1<br>**कथापात्रचर्चा,परिशीलनम् अवतरणं च**<br>पाठेऽस्मिन् छात्राणामिष्टतमं कथापात्रमधिकृत्य चर्चा,नतस्य कथापात्रस्य रङ्गाविष्कारश्च करणीया।(इष्टस्य कारणं कार्यसहितं स्थापनीयम्) अन्ते सर्वे मिलित्वा पाठ्यांशस्य रङ्गावतरणं करणीयम्। | |
| Module -1<br>**सतालमालपनम्**<br>पाठेऽस्मिन् विद्यमानानां श्लोकानां सताल मालपनाय छात्रान् प्रेरयति। श्लोकभावः श्रद्धेयः | |
| Module -1<br>**टिप्पणीरचना**<br>नाटकमधिकृत्य,कथापात्रान् अधिकृत्य च टिप्पणी लेखनीया। वैयक्तिकमिदं कार्यम्। | |

Unit Evaluation

एकेन पदेन उत्तरत।

| | | | |
|---|---|---|---|
| १ | उत्तररामचरितं कस्मिन् काव्यविभाघेऽन्तर्भवति? | (नाटकविभागे) | १ |
| २ | उत्तररामचरितस्य कर्ता कः? | (भवभूतिः) | १ |
| ३ | उत्तररामचरितस्यनाटकस्याङ्गि(मुख्य)रसः कः? | (करुणम्) | १ |

श्लोकस्य गद्यक्रमं लिखत।

४ योऽयमश्वः पताकेयमथवा वीरघोषणा।

सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः।। See TB p.71 ३

विग्रहवाक्यं लिखत

५ (क) शतसंख्याः, (ख) अक्षत्रिया, (ग) किंप्रयोजनः See TB p.69 ३

विश्लेषयत

६ आलापैर्यूयम् See TB p.68 १

सम्भाषाणं लिखत

७ लव-चन्द्रकेतु संभाषणं सम्भाव्य लिखत। ५

+

C E

# प्रतिकरणपुटम्

| अनुभूताः क्लेशाः । | | |
|---|---|---|
| अध्यापकस्य | छात्राणाम् | परिहरणोपायानि |
| | | |